रेव तत् पुत्रत्वोत्पत्तेर्न तदपेक्षेति तर्हि प्रकृतेऽपि तुल्यं प्रथमपदेनात् तत्सूचनात्। "सर्वांस्तु कुर्य्यात् संस्कारान् जातकर्म्मादिकान्नरः" इत्यन्तेऽभिधानाच्च। तस्मात् पुत्रेष्ट्या पूर्वसंस्कारप्रयुक्तदासत्वापनोदपूर्वकप्रजात्वसम्पादनात् संस्कृतोऽपि परिग्राह्य इति स्थितम्। यद्येवं तर्हि संस्कृतमित्येव वाच्यम् किं पञ्चवर्षीयपदोपादानेनेति चेन्नैवम् पञ्चवर्षीयस्यैवेति नियमार्थत्वात् नियमश्चाक्षरग्रहणपूर्वकब्रह्मचर्य्यसफलकोपनयनप्राप्त्यर्थः। नचायन्नियमः पूर्ववाक्येनैव सिद्ध इति वाच्यम् तस्याकृतसंस्कारावधिसमर्पकत्वेन प्रकृतत्वाभावे परिगृहीतत्वात्। प्रथममिति संस्कारेभ्यः प्रागित्यर्थः। ननु परिग्रहहोमादेव प्रागिति कुतो नेष्यते, गृहीत्वेति श्रुतया ग्रहणभावनायाः क्त्वाप्रत्ययेन पूर्वकालतावगमात्। पुत्रेष्ट्या पूर्वसंस्कारापनोदेन संस्कारान्तरावश्यापेक्षणाच्चेति"।

पुत्त्रच्छायावहमित्यस्यार्थस्तत्रैवोक्तो यथा

"पुत्रच्छाया पुत्रसादृश्यं तच्च नियोगादिना स्वयमुत्पादनयोग्यत्वम् यथा भ्रातृसपिण्डसगोत्रादिपुत्रस्य, नचासम्बन्धिनि नियोगासम्भवः"वीजार्थं ब्राह्मणः कश्चिद्धनेनोपनिमन्त्र्यतामिति" स्मरणेन निमन्त्रणसम्भवात्। ततश्च भ्रातृपितृव्यमातुलदौहित्रभागिनेयादीनां निरासः पुत्रसादृश्याभावात्। एतदेवाभिप्रेत्योक्तमग्रे तेनैव "दौहित्रो भागिनेयश्च शूद्राणां विहितः सुतः। ब्राह्मणादित्रये नास्ति भागिनेयः सुतः क्वचिदिति"। अत्रापि भागिनेयपदं पुत्त्रासदृशानां सर्व्वेषामुपलक्षणं विरुद्धसम्बन्धस्य समानत्वात्। विरुद्धसम्बन्धस्य नियोगादिना स्वयमुत्पादनायोग्यत्वम्। यथा विरुद्धसम्बन्धो विवाहगृह्यपरिशिष्टे च वर्जितः। "दम्पत्योर्म्मिथः पितृमातृसाम्ये विवाहो विरुद्धसम्बन्धो यथा भार्य्यास्वसुर्दुहिता पितृव्यपत्नीस्वसा चेति"। अस्यार्थः यत्र दम्पत्योर्बधूवरयोः पितृमातृसाम्यं बध्वा वरः पितृस्थानीयो भवति वरस्य वा बधूर्मातृस्थानीया भवति तादृशो विवाहो विरुद्धसम्बन्धः तत्र यथाक्रममुदाहरणद्वयं भार्य्यास्वसुर्दुहिता स्यालिकापुत्त्री पितृव्यपत्नीस्वसा पितृव्यपत्न्या भगिनी चेति। तथा प्रकृते विरुद्धसम्बन्धः पुत्त्रो वर्ज्जनीय इति यतो रतियोगः सम्भवति तादृशः कार्य्य इति यावत्।"

"परिग्रहविध्यभावे विशेषमाह मनुः। "अविधाय विधानं यः परिगृह्णाति पुत्त्रकम्। विवाहविधिभाज्जं तं कुर्य्यान्न धनभाजनमिति"। परिग्रहविधिं विना परिगृहीतस्य विवाहमात्रं कार्य्यं न धनदानमित्यर्थः किन्तु तत्र पत्न्यादय एव धनभाजः विधिं विना तस्य पुत्त्रत्वानुत्पादात्। अतएव वृद्धगौतमः "सगोत्रेषु कृता ये स्युर्दत्तक्रीतादयः सुताः। विधिना गोत्रतां यान्ति न सापिण्ड्यं विधीयते" इति विधिनैव गोत्रतां यान्तीति नियमः दानादिविधीनां दत्तकादिलक्षणान्तर्गतत्वेन स्वरूपनिर्वाहकत्वात् यथोक्तं "यमद्भिः पुत्त्रमापदि"। अब्ग्रहणं सकलदानविधेरुपलक्षणं तेन च प्रतिग्रहविधिरप्याक्षिप्तो भवति"।

"मेधातिथिरपि दत्तकादिषु संस्कारनिमित्तमेव पुत्त्रत्वमाह "सत्यपि प्रयोगे इन्द्रादिशब्दवल्लोकतोऽर्थातिशयात् शास्त्रे चोत्पत्तिविधानात् भार्य्यादिव्यवहारवत् पुत्त्रत्वव्यवहारोऽवगन्तव्य इत्यादिग्रन्थसन्दर्भेण"। तस्मात् दत्तकादिषु संस्कारनिमित्तमेव पुत्त्रत्वमिति सिद्धम्। दानप्रतिग्रहहोमाद्यन्यतमाभावे तु पुत्त्रत्वाभाव एवेति।"

दत्तकस्य जनकग्रहीत्रोर्मध्ये सापिण्ड्यमस्ति न वेति संशयनिर्णयाय सापिण्ड्यविशेषस्य तयोरभावस्तत्र प्रतिपादितः "ननु मनुवचनात् जनकगोत्रनिवृत्तावपि प्रतिग्रहीतृगोत्रप्राप्तौ किं मानमित्यत आह वृहन्मनुः। दत्तक्रीतादिपुत्त्राणां वीजवप्तुः सपिण्डता। पञ्चमी सप्तमी तद्वत् गोत्रं तत्पालकस्य चेति"। दत्तक्रीतादिपुत्त्राणां वीजवप्तुर्जनकस्य सपिण्डतास्त्येव दानादिनापि सा न निवर्त्तते तस्या अवयवान्वयरूपतया यावच्छरीरं दुरपनेयत्वात् अनेनावयवान्वय एव सापिण्ड्यं न पिण्डान्वय इत्युक्तं भवति पिण्डान्वयस्य"व्यपैति ददतः स्वधेति"अपगमावगमात्। सा च सपिण्डता कियतीत्यपेक्षायामाह पञ्चमी सप्तमीति। पञ्चानां पूरणी पञ्चमी पञ्चपुरुषव्याप्तेत्यर्थः एवं सप्तमी। गौतमोऽपि "ऊर्द्ध्वं सप्तमात् पितृबन्धुभ्यः वीजिनश्च मातृबन्धुभ्यः पञ्चमादिति"। अत्र वीजिग्रहणं दत्तकाद्युत्पादकानां सर्व्वेषामपि संग्रहार्थं न केवलं क्षेत्रजोत्पादकस्यैव "य एतेऽभिहिताः पुत्त्राः प्रसङ्गादन्यवीजजाः। यस्य ते वीजतो जातास्तस्य ते नेतरस्य त्विति" मनुस्मरणात्। तस्य ते पुत्त्रा इति पुत्त्रत्वप्रतिपादनं सापिण्ड्यप्रतिपादनार्थं न तु पुत्त्रत्वोत्पादनार्थं "पुत्त्रान् द्वादश यानाह" इत्यादिप्रतिग्रहीतृपुत्त्रत्वप्रतिपादनविरोधात्